International Journal of Sanskrit Research 2018; 4(1): 53-56

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 53-56
© 2018 IJSR
www.anantaajournal.com
Received: 19-11-2017
Accepted: 21-12-2017

**Dr. Giridhari Panda**
Coordinator, Assistant Professor, Department of Sanskrit (UG & PG), M.C. Research Centre in Humanities & Soc.Sc., Midnapore College (Autonomous), Midnapore, West Bengal, India

**Corresponding Author:**
**Dr. Giridhari Panda**
Coordinator, Assistant Professor, Department of Sanskrit (UG & PG), M.C. Research Centre in Humanities & Soc.Sc., Midnapore College (Autonomous), Midnapore, West Bengal, India

# शाब्दिकनये शक्तिस्वरूपविमर्शः

**Dr. Giridhari Panda**

## प्रस्तावना

गृहीतशक्तिकात् पदात् शाब्दबोधस्य दर्शनात् अगृहीतशक्तिकात् पदात् शाब्दवोधस्यादर्शनात् शाब्दबोधं प्रति शक्तिग्रहस्य कारणता स्वीक्रियते । येन 'गुड' इत्युक्ते गुडपदेन मधुरत्वस्य प्रतीतिर्न भवति । तस्याः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति वैयाकरणाः । शाब्दवोध कारणत्वेन अपेक्षिता एषा वृत्तिः शक्ति लक्षणा व्यञ्जना' चेति भावेन त्रिधा विभज्यते । तत्र 'शक्ति इति क पदार्थ' इति विवेचनावसरे शास्त्रकारेषु वैमत्यं परितक्ष्यते । मुख्यतः विषयेऽस्मिन् वैयाकरण-नैयायिकयोः विवादः समधिकः । प्राचीननैयायिका: ईश्वरेच्छारूपां शक्तिं स्वीकुर्वन्ति । नव्यनैयायिकाः केवलमिच्छामेव शक्तिरिति प्रतिपादयन्ति। तत्रापि वैयाकरणेषु भिन्नं मतं परिलक्ष्यते । वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति । भट्टोजिदीक्षित-कौण्डभट्टादीना मते बोधजनकत्वम् एव शक्तिः । नागेशः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति निरूपयति । भर्तृहरिरपि पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति स्वीकरोति ।

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।"[1]- इत्युक्त्यनुसारेण शब्देनैवार्थस्याववोधनत्वात् शब्दस्य शक्तिः सर्वजनग्राद्या व्याकरणशास्त्रे यद्यपि शब्दो नित्यो विभूरूपेण च प्रतिष्ठितस्तथापि शब्दस्यास्य प्रयोगहेतुर्भवति अर्थबोधः । अर्थात् अर्थायैव शब्दप्रयोगः शब्दशास्त्रे । तर्हि शब्दोच्चारणार्थजनकता सिद्धा भवति। भाष्यकारेणोच्यते यथा – 'सिद्धे शब्दार्थसम्बन्धे'[2] । तत्त्वमेत् स्वीकृत्य वाक्यपदीयकारेणापि उक्तं यत् – "अर्थप्रवृत्तितत्त्वानां शब्द एवं निबन्धनम्"[3] । तत्र अर्थस्य प्रतिप्रत्तिः शब्देनैव विधीयते । यदुक्तं हरिणा 'पदार्थजातयः सर्वा शब्दाकृतिनिबन्धना:"[4] । अतः शब्दो येनोपायेन अर्थबोधं प्रकाशयति सैव भवति वृत्तिः । वृत्तिरियं भवति शाब्दबोधजन्य हेतुः । यत्र शब्दार्थयोर्मध्ये विशेषैकः सम्बन्धो वर्तते, येन शब्द अर्थबोधाय प्रयोगभूतो भवति । विषयेऽस्मिन् भर्त्तृहरिणापि प्रतिपादितं यत्—

---

[1] . वा. प. – 1.123

[2] . म. भा.पस्पशा – वा-1

[3] . वा. प. - 1.13

[4] . वा. प. (ब्र. का)

"ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा
तथैव सर्वशब्दामेते पृथगवस्थिते ।।"[5] इति ।

अर्थात् यथा तेजसः सद्भावे वस्तुनि दृष्टिपथमागच्छन्ति, तत्तेजसैव पुनस्तेजोपि इन्द्रियगोचरो भवति । तथैव शब्दग्राहकत्वशक्तया अर्थाः प्रतीयन्ते ग्राहत्वशक्तच्या च वर्णात्मकशब्दो बुद्धिविषयो भवति ।

अतः अर्थबोधायैव प्रकल्पिता: शब्दाः, तथा च ते शब्दा: येनोपायेनार्थ बोधयति सैव उपायो
भवति वृत्तिः । वृत्तिरयं भवति शाब्दबोधजन्य हेतुः । तर्हि नागेशचार्येणोक्तं यत् – "शाब्दबोधे वृत्तिग्रहजन्योपस्थितिर्हेतुरिति सिद्धान्तः" । येन घटशब्दवदाकाशादिविषयकशाब्दबोधे वारणं जायते।
तथैव सर्वशब्दामेते पृथगवस्थिते ।। इति ।

अत्रेदमेव तात्पर्यं यत् -- यथा तेजसः सद्भावे वस्तूनि दृष्टिपथमारोहन्ति, तत्तेजसैव पुनस्तेजो अपि इन्द्रियगोचरो भवति । तथैव शब्दग्राहकत्वशक्तया अर्थाः प्रतीयन्ते ग्राह्त्वशक्तच्या च वर्णात्मकशब्दो बुद्धिविषयो भवति । अतः अर्थबोधायैव प्रकल्पिता: शब्दाः, तथा च ते शब्दाः येनोपायेनार्थं बोधयति स एव उपायो भवति वृत्तिः । वृत्तिरियं भवति शाब्दबोधजन्य हेतुः । तर्हि नागेशाचार्येणोक्तं यत् - "शाब्दबोधे वृत्तिग्रहजन्योपस्थितिर्हेतुरिति सिद्धान्तः । येन घटशब्दवदाकाशादिविषयकशाब्दबोधे वारणं जायते ।

तस्मात् 'शाब्दबोधं प्रति शक्तिग्रहमेव कारणमिति धिया शब्दस्य शक्तिः सर्वै शास्त्राकारैः स्वीक्रियते । यदुक्तं नागेशेन परमलघुमंजुषायां

"तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः" [6] । गृहीतशक्तिकात् पदात् शाब्दवोधस्य दर्शनात् अगृहीतशक्तिकात् पदात् शाब्दबोधस्यादर्शनात् शाब्दबोधं प्रति शक्तिग्रहस्य कारणता स्वीक्रियते । येन 'गुड' इत्युक्ते गुडपदेन मधुरत्वस्य प्रतीतिर्न भवति । तस्याः शक्ते आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति वैयाकरणाः | शाब्दवोधे कारणत्वेन अपेक्षिता एषा वृत्तिः शक्तिः लक्षणा व्यञ्जना' चेति भावेन त्रिधा विभज्यते । काव्यमार्गे शब्दस्य त्रैविध्यं शक्तित्वं स्वीक्रीयते - वाचकः, लाक्षणिक, व्यञ्जकश्च। तत्र 'शक्तिरिति पदार्थ' इति विवेचनावसरे शास्त्रकारेषु वैमत्यं परिलक्ष्यते । मुख्यतः विषयेऽस्मिन् वैयाकरणनैयायिकयोः विवादः समधिकः । प्राचीननैयायिका ईश्वरेच्छारोपणशक्तिं स्वीकुर्वन्ति । नव्यनैयायिकाः केवलमिच्छामेव शक्तिरिति तत्रापि वैयाकरणेषु भिन्नं मतं परिलक्ष्यते । वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति । भट्टोजिदीक्षित-कौण्डभट्टादीनां मते वोधजनकत्वम् एव शक्तिः । नागेशः पदपदार्थयोः सम्बन्धान्तरमेव अस्मिन् विचारं विधायं वैयाकरणसिद्धान्तलघुमञ्जूषायां,

वैयाकरणसिद्धान्तपरमलघुमञ्जूषायाञ्च यत् तद्धर्मामविच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित-वृत्तिविशिष्टज्ञानं हेतुः । ज्ञाने वृत्तिवैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसमानाधिकरण्य स्वाश्रयपदविषयकत्वोभयसम्बन्धेन इति अर्थात् यस्याशयो भवति- घटशब्दश्रवणानन्तरं घटत्वाववच्छिन्नविषयको शाब्दबोधो सर्वेषां जनानां न भवति, किन्तु घटपद-घटत्वावच्छिन्नवाचकमित्याकरकं शक्तिज्ञानं येषां वर्तते तेषामेव भवति । घटपदशक्तिग्रहवतामपि घटपदश्रवणानन्तरं पदविषयको बोधो न भवति इत्यनुभवबलात् 'नहि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते' इति समर्थः पदविधि[7]रिति सूत्रभाष्यादेव पूर्वोक्तः शाब्दबोध-वृत्तिज्ञानयोः कार्यकारणभावः स्वीकृतो नागेशभट्टेन । स्वीकृते चेदृशे कार्यकारणभावे गुडपदाद् गुडत्वप्रकारक एव शाब्दबोधो भवति, न तु मधुरत्वप्रकारकस्य यतो गुडपदं गुडत्वावच्छिन्नवाचकमित्याकरक शक्तिग्रहः अतो यद्धर्मप्रकारको वृत्तिग्रहस्तद्धर्मप्रकारक एव बोधो भवतीति शाब्दबोधवृत्तिज्ञानयोः पूर्वोक्तकार्यकारणभावे तद्धर्मावच्छिन्नेति निवेशितम् । घटपदं घटावच्छिन्ने शक्तमित्याकरकं यस्य पुंसः शक्तिज्ञानं तस्य पुंसः घटपदाद् घटत्वप्रकारक- शाब्दबोधवारणाय करणदले तद्धर्मावच्छिन्नेति निवेशितम् । तद्धर्मावच्छिन्नेत्यस्य निवेशे तु घटत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति घटत्वावच्छिन्ननिरूपितशक्तिज्ञानस्यैव कारणत्वमिति प्रकृते कारणाभावात् शाब्दबोधो घटत्वावच्छिन्नप्रकारको न भवति, किन्तु घटावच्छिन्न एव भवति ।

भर्तृहरिरपि शब्दस्य नित्यतामङ्गीकृत्य सम्बन्धस्य धर्म शक्तीनामप्यसौ शक्तिः[8] इति वचनेन पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति स्वीकरोति । तन्मते वोधरूपं कार्य दृष्ट्वा शब्दनिष्ठा शक्तिरनुमीयते । यथोक्तं तेन –

[5] . वा.प. – 1.55

[6] . प.ल.म. – श.प्र.

[7] . म.भा. --

[8] . वा. प. ३-३-६

"उपकार: स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुण:" [9]।।

तत्सम्बन्धत्वं पदनिष्ठत्वं वाक्यनिष्ठत्वञ्च । वैयाकरणानां मते सः वाच्यवाचकभावरूप: सम्बन्धः वाक्ये वर्त्तते । अन्येषां मते तु पदे वर्तते । नैयायिकाः केवलं साधुषु शब्देषु शक्तिं स्वीकुर्वन्ति । अपभ्रंशेषु शक्तिं न स्वीकुर्वन्ति । शाब्दिका: 'समानायामर्थावगतौ शब्देश्चापशब्देश्च शास्त्रेण धर्मनियम:[10] (म.भा. पस्पशा) इति भाष्यवचनमाधारीकृत्य साधुशब्दा इव असाधुशब्देष्वपि शक्तिं स्वीकुर्वन्ति । भर्तृहरिः 'वाचकत्वावशेषेऽपि नियम: पुण्यपापयो: [11] (वा. प.-३.३.३०) इति कारिकामाध्यमेन असाधुशब्देषु अपभ्रंशेषु वा शक्तित्वमङ्गीकरोति। मीमांसाशास्त्रे आर्यम्लेच्छाधिकरणस्य सङ्गतत्वात् मीमांसकाः अपि अपभ्रंशेषु शक्तिं स्वीकुर्वन्ति इति नागेश: तदीये व्याख्याने लघुमंजुषायां परमलघुमञ्जूषायां च प्रतिपादयति । इश्वरेच्छाशक्तिरिति तार्किका: । सा चेच्छा द्विविधा पदप्रकारकार्थविशेषिका अर्थप्रकारकार्थविशेषिका चेति । तार्किकै: शक्ते: स्वरूपद्वयमङ्गीकुर्वन्ति । अस्माच्छब्दादयमर्यथो बोधव्यः इत्याकारा इदं पदमिममर्थं वोधयतुं इत्याकारा ईश्वरेच्छा शक्तिः ।
वैयाकरणा: मतमिदं न स्वीकुर्वन्ति । एतेषां नये तार्किकोक्तमीश्वरेच्छाया: शक्तित्वं न समीचनीम् ।यतो हि यदा ईच्छाया: सम्बन्धत्वं, सिद्धयेत् तदैव तस्याः शक्तेः शक्तित्वं स्यात् । यो हि आधाराधेयभावनियामकत्वेन दृष्टः स एव सम्बन्धः प्रकृते च ईच्छीयविषयताश्रयवोधनिष्ठजन्यतानिरूपितजनकतारण्य विषयतासम्बन्धेनायमर्थः इच्छावान् । अयं शब्दो वा इच्छावान् इति व्यवहारस्य अदर्शनात् इच्छाया: सम्बन्धत्वाभावः ।
कौण्डभट्टाचार्यस्य मतानुसारेणापि शाब्दबोधकारणीभूताया: यादृशः पदार्थोपस्थितिस्तादृशपदार्थापस्थित्यनुकूलो यः पदपदार्थयोः सम्बन्धः सा वृत्तिरित्युच्यते । यद्यपि वृत्तिपदेन शक्तिलक्षणानां प्रत्यक्षप्रवेश स्वीकरोति, तथापि वृत्तिसमर्थने स्वभूषणसारग्रन्थे उक्तं - "अथ वृत्तिजन्योपस्थित्वेनैव शाब्दबोधहेतुता, वृत्तिज्ञानत्वेन च हेतुतावच्छेदकपार्थोपस्थितिहेतुवृत्रज्ञाने तद्घटितकार्यकारणभावग्रहस्याप्यसम्भवात् "[12] इति । तर्हि घटादिपदज्ञानजन्या या घटादि पदार्थोपस्थितिः सा घटादिपदार्थविषयकशाब्दबोधे कारणं भवतीति । अत एव स्पष्टञ्चेदं यत् वृत्तिर्माध्यमेन शब्दार्थयोर्मध्ये एकः सम्बन्धः परिवेष्ठितः । अतः शब्दो नित्योऽर्थोऽपि नित्यस्तेषां सम्बन्धोऽपि नित्यरूपेण महाभाष्यादिग्रन्थे प्रकाशितम्। अत एव बोधजनकतैव हेतुः इति कौण्डभट्टस्य सिद्धान्तः ।
नागेश: परमलघुमञ्जूषायां वोधजनकत्वमपि शक्तिः इति दीक्षितादीनां मतमपि न स्वीकरोति । तन्मतानुसारेण वोधजनकत्वमपि न शक्तिः, तस्यापि उभयवृत्तित्वाभावः ।
प्रसङ्गे अस्मिन् सम्बन्धस्य लक्षणमुच्यते यत् – सम्बन्धो सम्वन्धिद्वयभिन्नत्वे सति, द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः ।[13] अत्र सम्वन्धलक्षणे अंशत्रयं तत्र द्विष्ठः सम्बन्धः इति भर्तृहरे: सिद्धान्तः । अत्र सम्बन्धघटकेन प्रथमांशेन अभेदस्य सम्बन्धत्वनिरास:, द्वितीयांशेन केवलजन्यत्वादेः सम्बन्धत्वनिरास: तृतीयांशेन वृत्तनियामकविषयकत्वादीनां सम्बन्धत्वनिरासाः । एवमेव इच्छाया अपि सम्बन्धनिरास इति वोधः । अत: नागेशमतानुसारेण पदपदार्थयोः सम्बन्धान्तरमेव शक्ति: सा शक्तिः वाच्यवाचकभावापरपर्याया । अत्र वाच्यवाच्यकत्वे अखण्डपदार्थरूपमेव वाध्यम् । न तु वाच्यं वाच्यकत्वं वा । बोधविषयकत्वं बोधजनकत्वमिति सखण्डम् । अयञ्च वाच्यवाचकभावः शब्दार्थयोर्भयनिष्ठ: ।
वस्तुतस्तु शब्द: नित्य:, अर्थ: नित्य:, शब्दस्य शक्तिः बुद्धिविषयः । तादात्म्यसम्बन्धेन एव भेदाभेद: आरोपितः । येन शब्दार्थयो: तादात्म्यस्वीकारे मधुशब्दोच्चारणेन मुखे माधुर्यरसत्वापत्तिः अथवा वह्निशब्दोच्चारणे मुखे दाहापत्तिः इत्यादयः आशङ्का: न जायन्ते । भर्तृहरिणापि पदपदार्थयो: तादात्मरूपसम्बन्ध एव शक्तिः "उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ" इत्युपपादनतः स्वीक्रियते ।
यत्र शब्दे उपकारस्वभाव: सम्बन्धोऽस्ति तत्र शब्दे धर्म: शक्तिर्वा अनुमीयते। अत: शाब्दवोधे कारणरूपा बुद्धिरूपा शक्ति: बुद्धिर्निग्राह्या स्फोटरूपा च । सा शक्ति: तादात्म्यसम्बन्धेन वाच्यवाचकरूपा । स्फोटात्मकं पदमिव शक्यार्थो अपि बुद्धिसत्तासमाविष्ट एव, न तु वाह्यसत्ता आविष्टः इति वैयाकरणानामाशयः ।
अत एव वैयाकरणा: शक्ते: आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति । पदपदार्थयो: सम्बन्धान्तरमेव शक्तिरिति, अथवा वाच्यवाचकभावापरपर्याया एव शक्तिरिति स्वीकारेण न काचित् विप्रतिपत्तिरिति शाब्दिकानां सिद्धान्तः ।

9 . तत्रैव
10 . म.भा. पस्पशा
11 . वा. प.- ३.३.३०
12 . वै. भू. सा - शक्तिनिर्णयः
13 . प.ल.म. – शक्तिप्रकरण--

## सहयकग्रन्थसूची


1. वैयाकरणभूषणसार, दर्पण-प्रभासमेत, चौखम्बा संस्कृत सीरीज-अफिस, भारनसी, १९६९
2. वैयाकरणसिद्धान्तकौमुदी, मोतीलाल बनारसी दास दिल्ली, २०००
3. वैयाकरणसिद्धान्तलघुमञ्जूषा, कुञ्चिका कलासम्वलिता चौखम्वा संस्कृत सीरीज, वाराणसी, १९८५
4. व्याकरणदर्शनर इतिहास, गुरुपदहालदार कोलकाता १३५० वडाब्द।
5. शब्दशक्तिप्रकाशिका, चौखम्बा संस्कृत-सीरीज, वारणसी, १९३५
6. प्रकरणपञ्चिका, शालिकनाथ, वेनारस हिन्दु-युनिभार्सिटि, वारानसी, १९६१
7. प्रौढमनोरमा, शब्दरत्न- भैरवी-भावप्रकाश टीका सम्वलिता, चौखम्बा-संस्कृत-सीरीज, भारानसी।
8. महाभाष्यम्, प. दधिरामशर्मा, चौखम्बा-सुरभारती प्रकाशनम्, वारणसी, १९८८
9. मानमेयेदय, श्रीदीननाथ त्रिपाठिनवर्तीर्थ, संस्कृत कलेज, कोलकाता, १९९०
10. वाक्यपदीयम्, सम्पूर्णनन्द संस्कृत विश्वविद्यालय, वारणसी, १९९८ ११ न्यायदर्शनम्, श्रीयुक्तफणिभूषणतर्कबागीश, पश्चिमवड़-राजक-पुस्तक कोलकाता, १९८३
11. न्यायसिद्धान्तमुक्तावली, किरणबलीटीक वारणसी, वि २०६३ -वल्लभाचार्य्य चौखम्वा संस्थानम्,
12. वाक्यपदीयम्, सम्पूर्णनन्द संस्कृत विश्वविद्यालयः, वारणसी, १९९८
13. न्यायदर्शनम्, श्रीयुक्तफणिभूषणतर्कबागीश, पश्चिमवङ्ग-राजक-पुस्तक-पर्षद्, कोलकाता, १९८३